प्रवेश सं० ———

विषय: धर्मशास्त्रम्

क्रम सं० ———

नाम शुद्धि विवेकः

ग्रन्थकार लक्ष्मीधर सुत-रुद्रध

13739

पत्र सं० ~~१-१०९~~ १-४६, ४६-४९, ५१-७०, १, ७१-७६, १

श्लोक सं० ———

अक्षर सं० (पंक्तौ) ३२

पंक्ति सं० (पृष्ठे) ८

आकार: ८·६ × ४·२

लिपि: दे. ना.

आधार: का.

वि० विवरण सं०

सं. १२३५

अ. ६४/१६९

पी० एस० यू० पी०—७७ एम० सी० ई०—१९५१—५० ०००

Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts

१ ॥६॥ स्वस्तिश्रीगणेशायनमः॥ हरतुदुरितजातंकेशवस्यैकवाहुर्विपुलगल...
लांतःकेशिनःसंप्रविष्टः॥ अप्रसुपवनमिवास्यप्राशितुंसंप्रवृत्तः॥ कुवलयद
शु० लनीलःपंचशीखोभुजंगः॥ चिरंतनानेकनिबंधसिद्धःसुसंप्रदायानुगतःसु
धर्षीःनत्वाहरिंरुद्रधरेणसम्यग्वितन्यतेशुद्धिविवेकएषः॥ सत्येवरत्नाकरपारिजा
तमिताक्षराहारलतादयोन्ये॥ तथापितत्रात्रसमातसानांभवेत्प्रमोदायममप्रयासः॥
शुद्धिस्तावदखिलविहितकर्माधिकारयोग्यतापादकोधर्मविशेषः॥ अशुद्धिस्तद्विरोधी
धर्मविशेषएव॥ सपिंडजन्मादिनिमित्तका॥ तदशुद्धिविगमसमयकथनेनशु॥ राम
द्धिर्विधीयते॥ तत्रसपिंडजन्मादिअज्ञातोशुद्धिहेतुःसेनयदिसपिंडादेर्जन्ममरणंवा १
ि

वत्समस्तिनचाशौच॥ यतियोगिनाज्ञायतेप्रतिग्रहादिकर्त्ताज्ञायते तदापितत्स
काशात्प्रतिग्रहादानेतदन्नभोजनेचनदोषः॥ यदाहब्रह्मपुराणे॥ अपि
दातृगृहीत्रोश्चसूतकेमृतकेतथा॥ अविज्ञातेनदोषःस्यात्॥ श्राद्धादि
षुकदाचन॥ विज्ञातेभोक्तुरेवस्यात्प्रायश्चित्तादिकंक्रमात्॥ अथसामा
न्यतश्चातुर्वर्ण्यस्यमृतकाशौचं॥ तत्रमनुः शुद्ध्येद्विप्रोदशाहेनद्वादशा
हेनभूमिपः॥ वैश्यःपंचदशाहेनशूद्रोमासेनशुध्यति॥ ब्रह्मपुराणे॥ शौ
चाशौचंप्रकुर्वीरन्शूद्रवद्वर्णसंकराः॥ वर्णसंकराअपकृष्टवर्णेसम
बुजाता॥ अनुलोमानांतुस्वामातृजात्युक्तमशौचं॥ तत्रापि

२

बृहस्पतिः ॥ दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके ॥ त्रिरात्रेण
स्नात्वा शुध्यंति गोत्रजाः ॥ अत्र दशाहपदं स्वस्वजात्युक्ताशौचोपलक्षणं
शु० ३ सपिंडाः सप्तपुरुषावधयः सवंश्याः ॥ सप्तमपुरुषादनंतरं दशमपुरुषपर्याव
त् सकुल्याः ॥ दशमपुरुषादनंतरं जन्मनाम्नोरविज्ञाने समतकुलजा एवमा
कारज्ञानगोचरा गोत्रजाः ॥ ज्ञायमानजन्मनाम्नां तु दशमपुरुषाधि
कानां मरणजन्मनोः ॥ पाक्षिणी पक्षिणी सपिंडस्य जनने नाग्रे वक्ष्यते
नदयंतवैकवान्यूनतयार्थः ब्राह्मणस्य सपिंडे ब्राह्मणस्य मृते दशरात्रेणाशु राम
ध्यति सकुल्ये मृते त्रिरात्रेण तदूर्ध्वं ज्ञायमानजन्मनामके कुलजे मृते प

२

क्षिणा गोत्रजे स्नानमात्रेण क्षत्रियस्य सपिंडे क्षत्रिये मृते द्वादशाहेन शु
~~क्षिणा गो~~
द्धिः सकुल्ये त्रिरात्रेण तदूर्ध्वं पक्षिणा गोत्रजे स्नानमात्रेण वैश्यस्य सपिंडे वै
श्ये मृते पंचदशदिनैः शुद्धिः सकुल्ये त्रिरात्रेण तदूर्ध्वं पक्षिणा गोत्रजे स्नान
मात्रेण शूद्रस्य सपिंडे शूद्रे मृते मासेन शुद्धिः सकुल्ये त्रिरात्रेण तदूर्ध्वं प
क्षिणा गोत्रजे स्नानमात्रेण अत्र सर्वत्र अहःपदं त्रिपदं च अहोरात्रपरं
ज्ञातव्यं यदा रात्रौ संध्ययोर्वा मरणजन्मनोर्भावः तदातीतदिनेनैव सह
होरात्रो ग्राह्यः एकाहकस्य पः रात्रावेव समुत्पन्ने मृते रजसि सूतके पूर्व

Indira Gandhi National Centre for the Arts

हस्तस्य २

३ मेवदिनंग्राह्यंयावन्नैवोदितोरविः उदितेतुयदासूर्येनारीरतांदृश्यतेरजः
जननंवाविपत्तिर्वायस्याःसर्वरी अंगिराश्चतुर्थेहनिकर्त्तव्यःसंस्पर्शो
शु० ब्राह्मणस्यतुपंचमेहनिविज्ञेयःसंस्पर्शःक्षत्रियस्यतुषष्ठेहनिवैश्यस्य
स्याविज्ञेयंस्पर्शनंबुधैःदशमेहनिशूद्रस्यकार्यःसंस्पर्शनंबुधैःअत्रे
देताद्युत्तर्यंसर्वाशौचस्यात्तृतीयभागेतीतेगस्पर्शःकर्त्तव्यःतथाचदेवलः
अशौचकालाद्विज्ञेयंस्पर्शनंतुत्रिभागतःशूद्रविट्क्षत्रविप्राणां
यथाशास्त्रप्रदर्शनात् एवंचसतिब्राह्मणादीनांदशाहादिभ्योमन्तके राम
भ्योयद्नामधिकंसमयत्वमशौचस्यात्र घंतरोक्तंतद्गुणायुक्तंगु
३

णहीनविषयेज्ञेयं अप्यजननाशौचंतत्रमनुःजननेप्येवमेवस्यात् निपुणां
शुद्धिमिच्छतांसर्वेषांशावमाशौचंमातापित्रोस्तुसूतकंमातुर्वासूतकंस्यादुप
स्पृश्यपिताशुचिःअस्यार्थःजननेजन्मन्यपिएवमेवमरणवदशौचंदशाहादि
व्यापकंभवतिअयंविशेषःशावमाशौचंमरणेतुकमस्पृश्यत्वंसर्वेषामशौचम
गिनाःसूतकंप्रसवनिमित्तकंपुनरस्पृश्यत्वंमातापित्रोरेव॥तत्रापिविशेषमाह
मातुर्वेतिवाशब्दएवकारार्थःमातुरेवसूतकंदशाहव्यापकमस्पृश्यत्वलक्षणं
लक्षप्राहुःउपस्पृश्यस्नात्वापिताशुचिःस्पर्शोभवतीतिअशौचमितिशुचेर्मा
वइतिसंगताच्चलघुसर्वादित्वगणनअःशुचीच्वरेत्यादिनोभयपदवृद्धिःसंव
र्तेःजातेपुत्रेपितुःस्नानंसचेलस्यविधीयतेमाताशुद्ध्येद्दशाहेनस्नाना-

Indira Gandhi National
Centre for the Arts

४

नकः पत्नीसंस्पर्शं सूतकरोति तदानं पितुः अंभिराः सूतके सूतका
शु० स्पर्शी न दुष्यति संस्पर्शे सूतिकाया सुस्नानमेव विधीयते यदि तु जनकः पत्नी
के संस्पर्शं सूतिकां करोति तदा तस्यापि यावत् सूतकमस्पृश्यत्वं तथा च पाराशरः
यदि पत्न्यां प्रसूतायां द्विजः संपर्कमिच्छति सूतकं तु भवेत्तस्य यदि विप्रः ष
डंगवित् षडंगविदपि वि...। शोयदि संपर्कं संस्पर्शं करोति प्रसूताया पत्न्यास्तदा
तस्य सूतकं दशाहमस्पृश्यत्वं भवतीत्यर्थः अत्र संपर्को भिगमनमिति व्या
ख्यानमयुक्तं मातुरेव सूतकं तां स्पृशतस्तु। पितुर्नेतरेषामिति सुमंतुनैक राम
मूलत्वात् ब्रह्मपुराणे सूतके तु मुखं दृष्ट्वा जातस्य जनकः शुचिः कृत्वा स
चैलस्नानं तु शुद्धो भवति तत्क्षणात् अन्याश्च मातरस्त द्गृहं न व्रजंति ४

चेत् सपिंडाश्चापि संस्पृश्याः संति सर्वेपि नित्यशः अन्या मातरः सपत्नी...
मातरः तद्गृहं न व्रजेति तद्गृहं गत्वा तां वै न स्पृशेति तदा शुद्धा एव स्नानं वि
नापि एवं सपिंडा अपि तत्स्पर्शे तु स्नानेन शुध्यति एवमेव हारलता आ
चारोपि अत्र स्त्री जन्मनि स्नानानुपदेशात् पितुरपि स्नानं विनैव शुद्धिरिति
ज्ञेयः तथा ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः गतैः शूद्रा च संस्पृ
श्या त्रयोदशभिरेव च यत्तु सूतिका सर्ववर्णानां दशरात्रेण शुध्यतीति शू
द्राया अपि दशरात्रेण स्पर्शशुद्धिः कपिताप्रचेतसा सा सच्छूद्रविषया
ज्ञातव्या पैठीनसिः सूतिकां पुत्रजननीं विंशतिरात्रे अतीते पुनः कृतस्नानां
पाकादिदृष्टार्थं च कर्म कारयेत् स्त्र्यपत्योत्पत्तौ मासे तीते सर्वकर्माणि
ण स्नातां सर्वकर्माणि कारयेत्। मासेन स्त्री जननी अर्थः पुत्रे जाते सूतिकां विंशतिरात्रे २
स्ना

५ कारयेत इदं नुष्कद्वातिरिक्त विषयं ज्ञातव्यं ॥ अथ जननमरणाशौचे च योनि
यमः तत्र जाबालिः संध्यां पंचमहायज्ञान्नैत्यिकं स्मृतिकर्म च तन्मध्ये हापय
श्रु० येत् तदशाहांते पुनः क्रिया नैत्यिक ज्यैष्ठस्नानं तदीराादि तन्मध्ये ॥ अ
स्म शौचमध्ये हापयेत्स्पर्शे जेदित्यर्थः ॥ दशाहांत इत्यशौचांतोपलक्षणं तेना
शौचांते तेषां ब्राह्मणादीनां पुनः क्रिया संध्यादिकर्मकरणमित्यर्थः
मनुः ॥ उभयत्र दशाहानि कुलस्यान्नं न भुज्यते दानं प्रतिग्रहो होमः स्वा
ध्यायश्च निवर्त्यते ॥ उभयत्र जनने मरणे च दशाहानीत्यशौचकालोपलक्ष
णं तेन दशाहानि तत्तदशौचकालं व्याप्य कुलस्य सिद्धान्नं न भोक्तव्यमित्य राम
र्थः ॥ अत्र होमे विशेषमाह छंदोगपरिशिष्टे कात्यायनः सूतके कर्म ५

णां त्यागः संध्यादीनां विधीयते होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फ
लैः ॥ अकृतं हावयेत्स्मार्ते तदभावे कृताकृतं कृतमोदनशक्त्वादि तंडुलादि
कृताकृतं व्रीह्यादि चाकृतं प्रोक्तमिति द्रव्यं त्रिधा बुधैः ॥ अस्यार्थः ॥ अशौ
चे संध्यादीनां विहितकर्मणां त्यागः ॥ अग्निमतां तु श्रौताग्नौ शुष्कान्नेन
फलेन वा होमः कर्तव्यः स्मार्ते ग्नौ तु व्रीह्यादिना तंडुलादिना वा परद्वारा
होमकारयितव्यः कृतमोदनसक्त्वादि परद्वारापि न हावयेत् अत्र तंडुलादी
त्यादिपदेन माषमुद्गादिग्रहणं व्रीह्यादिपदेन यवगोधूमादिग्रहणं ओ
दनसक्त्वादिपदेन लाजमोदकलड्डुकादीनां ग्रहणं दानप्रतिग्रह
यो विशेषमाह मनुः जातिकुमारे तद्देहः कामं कुर्यात्प्रतिग्रहं हिरण्य

६ धान्यगोवाससितान्नगुडसर्पिषां शंखलिखितौ कुमारप्रसवे नाडी(च्छेदात्)
च्छिन्नायां गुडतिलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेषु न दोषः
श्रु० तदहरित्येके गुर्वर्थं कर्म कुर्वीत प्रावरणो केवलादिश्चयमर्थः पुत्रेज
न्मनि नाडीछेदात् पूर्वं हिरण्यधान्यादि दद्यात् दातुः प्रतिगृहीतुश्च दो
षो न भवति गुर्वर्थे प्रतिगृहीतुस्तद्दिने नाडीछेदानंतरमपि न दोषः वैष्ण
वपुराणे देवाश्च पितरश्चैव पुत्रे जाते हि जन्मनां आयांति तस्मात्तदहः पु
ण्यं षष्ठं च सर्वदा तत्र दद्यात्सुवर्णं च भूमिं गां तुरगं रथ्यं छागं च माल्यं च छत्रं
शयनं चासनं गृहं जातश्राद्धे च न देतप कान्नं वा स्मृतौ ष्वपि तदहः पुण्यं राम
षष्ठं च दिनं पुण्यमित्यर्थः पुत्रोत्पत्तौ नाडीछेदात् पूर्वं जातश्राद्धं मासिद्धा
६

न्नेन कर्तव्यं एवं रूपे च श्राद्धे अवने जनापिंडदानादिनास्तीति भर्तृयज्ञ
स्वामिना विवृतिरत्नाकरः मार्कंडेयः षष्ठे हि रात्रियागं तु जन्मदानां च
श्र कारयेत् रक्षणीया तथा षष्ठी निशा तत्र विशेषतः जन्मदानां षोडशमाह
तां षष्ठिको सहितानां रात्रियागं कुर्यादित्यर्थः षष्ठी निशा व्याप्य रक्षा तिरक्षा
कार्या रक्षा जन्मदा यशस्त्रादिसन्निधापनेनेत्यर्थः स्मार्तक्रियानिवृत्तिं
विशेषमाह शंखः दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च प्रेतपिं
डक्रियावर्जमशौचे विनिवर्तते प्रेतपिंडदानादिवर्जं सर्वं दानादि कर्म अशौ सर्वं
चे सति निवर्तत इत्यर्थः वसु विशेषदोषाभावमाह मरीचिः लवणे मधु
मांसे च पुष्पमूलफलेषु च शाककाष्ठतृणेष्वेव दधिसर्पिःपयःसु च

Indira Gandhi National Centre for the Arts

७
तोबध्याजिनेचैवपक्वापक्वंस्वयंगृहेयद्येषुचैवसर्वेषु नाशौचंमतं
तक्वेयय: यदमत्रदुग्धपरंदध्यादिसाहस्वयीत: वाक्यांतरानुरोधापक्व
शु० सक्तुमोदकादि अपक्वं तंदुलादि ततः स्वयंगृह्यमाणांस्वाम्यनुमत्या
नदोषायभवतीत्यर्थ: अत्रपक्वापक्वइत्यत्रैवस्वयंगृहेतैत्यन्वेतिमंतु
लवणादिष्विति एवमेवरत्नाकरस्वरसउन्नीयतेनतुस्वयंगृह्यमाणा
मितिपूर्वप्रक्रांतस्यपक्वापक्वस्यैकवचनांतस्य वैनाम्नाप्रत्युवमवि
त तेन लवणादीनामशौचविद्वारापिगृहणादोषाभावइतीसिद्धं अ
प्यवर्णानाविशेषतोशौचंतत्रदक्ष: सद्य: शौचंतथैकाहस्त्र्यहश्चतुर राम
हस्तथाषड्दशद्वादशाहश्चपक्षोमासस्तथैवचमरणांततथाचान्यद ७

शपक्षास्तुसूतकेउपन्यासक्रमेणैतान्वक्ष्याम्यहमशेषत: सूतकमशौ
चंतद्दशविधंभवतितत्रसद्य:शौचंसद्यस्तत्क्षणेस्नानमात्रेणयत्रशौचं
भवतिततसद्य:शौचंस्नानमात्रापनेयंमशौचंएकाह एकाहेना
त्रव्यापकंएवंत्र्यहादिष्वपितत्तत्कालव्यापकमशौचंभेदेनान्यदिति
जननमरणनिमित्तकात्भिन्नंमरणांतमन्यमशौचंदशममित्यर्थ:
तत्रसद्य:शौचमाहग्रंथार्थंतोविजानातिवेदमंगै:समन्वितंसक
ल्पंसरहस्यंचक्रियावांश्चेन्नसूतकंग्रंथार्थं। वेदिगंपतोर्थंतश्चवे
दंविजानातिसम्यक्सिद्धांतन्यायानुसारेणग्रंथंजानातिसकल्पं
कल्पोज्योतिष्टोमाद्यनुष्ठानप्रकृति: तत्सहितंअंगै:समन्वितं

Indira Gandhi National
Centre for the Arts

८ नयरपंचांगसहितंसरहस्यं रहस्यं प्रातिपादकब्रह्ममीमांसादिभि
र्यसहितं जानाति क्रियावान् श्रौतस्मार्ताग्निहोत्रादिक्रियावान् भवे
श्रु० दाः सूतकं न भवति एकाहाद्यशौचं न भवति तेन सद्यःशौचं भवतीत्यर्थः तद्
प्यारेकाहात्त्वाभ्यता: शुद्धेद्यो ऽग्निवेदसमन्वितः हीने हीनतरे चैवं त्र्यह
श्चतुरहस्तथा अग्निः श्रौतः स्मार्तश्च वेदः सांगोज्ञाततात्पर्यश्च ब्रह्म एकाहा
त्रविहितक्रिये एकदेशवान्न विवक्षितः तस्य एकाहः हीनः श्रौताग्निही
नः स्मार्ताग्निवान् सांगसार्थज्ञानसंपूर्णवेदवान् तस्य त्र्यहः शौचं ही
नतरो ऽग्निद्वयहीनः सांगसार्थज्ञानसंपूर्णवान् तस्य चतुरहाशौचकालः॥ राम
बृहस्पतिः त्रिरात्रेणा विशुध्येत्तु विप्रो वेदाग्निसंयुतः पंचाहेनाग्निहीन ८

---

नस्तु दशाहाद्ब्राह्मणाब्रुवः ऽप्यत्राग्निः स्मार्तः तद्वतो वेदज्ञस्य चैवं पूर्ववत्
न्याग्निद्वयहीनस्य अर्ध्यपीतवेदांगस्यान्यस्य वेदाध्यायिनः पंचाहः प
रिशेषाद् अग्निद्वयहीनस्य वेदैकदेशाध्यायिनः षडहः अत्र वाक्यद्
येपुनस्त्वन्यायतथाऽप्यग्निद्वययुतस्याविज्ञाततात्पर्यकृत्स्नवेदवतः सक
लविहितक्रियावतः एकाहः तथाग्निद्वययुतस्य वेदस्यान्यस्य त्र्यहः ब्रा
ह्मणाब्रुवस्य दशाहः ब्राह्मणाब्रुवः परिविहिताक्रियावतः सर्वाहं त
मपि तौ व्यासेन गर्भाधानादिभिर्युक्तस्तथोपनयनेन च न कर्म कृन्न चा
धीते स भवेद्ब्राह्मणाब्रुवः तदयं सर्वैकवाक्यतयार्थः सांगसार्थं

Indira Gandhi National
Centre for the Arts

दिभिर्युक्तस्योपनयने च न कर्मकृत् वेदवतोऽग्निहययुतस्य सकल
प्र॰ नक्रियावतो विप्रस्य सद्यःशौचं अविज्ञातार्थसांगवेदवतोऽग्निद्वययुक्त
द१ एकाहः सांगसार्थज्ञानवेतोऽग्निद्वययुतस्य विहितैकदेशक्रियावतोऽपि
काहः श्रौताग्निहीनस्य स्मार्ताग्निमतः सांगसार्थज्ञानवेदवतः त्र्यहः वेद
मन्यस्याग्निद्वयवतः त्र्यहः सांगसार्थज्ञानकृत्स्नवेदाध्यायिनोऽग्निद्व
यहीनस्य चतुरहः अस्य त्र्यंगस्यान्यकृत्स्नवेदाध्यापिनोऽग्निद्वयहीनस्य राम
पंचाहः वेदैकदेशाध्यापनोऽग्निद्वयहीनस्य षडहः ब्राह्मणब्रुवस्य दशाहः
इति पाराशरः संपर्काद् दुष्यते विप्रो जनने मरणे तु च संपर्कविनिवृत्तानां न प्रेत ऽ

नैव सूतकं प्रेतं मरणाशौचमित्यर्थः अत्र सर्वेषां तेषां यथोक्ताः सद्यःशौचा
दिका अपकर्षपक्षाः सपिंडांतराणामशौचिनां संपर्काभावे सति बोद्धव्याः
संपर्के च तेषामपि दशाहाद्यशौचं भवति अत्राचारोऽपि तथा संपर्कश्चात्र
एकत्रासनशयनभोजनादिरूपो विवक्षित इति रत्नाकरः क्षत्रियावैश्ययोरप्य
ग्निमतोर्दशाहद्वादशाहौ तथा च पाराशरः क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शु
शुचिः तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयादिति शूद्रस्यापि विशेषमा
ह याज्ञवल्क्यः क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु त्रिंशद्दिनानि शूद्र
स्य तदर्द्धं मायवर्तिनः न्यायवर्तिनः शूद्रस्य द्विजशुश्रूषापंचयज्ञादिप्र

Indira Gandhi National
Centre for the Arts

यावतः
२० द्विविहितत्वे किं शूद्रस्य पंचदशाहाशौचं सर्वं चैतद् शौचसंकोचविधानं निषि
प्रु० तेष्वेव होमादिविधिषु न तु सर्वेषु दानान्नभोजनप्रतिग्रहादिषु तेषु क
र्तव्येषु वास्तवादीनां दशाहादिकं संपूर्णाशौचमेवानुवर्तते इति मिता
क्षराकारादयः तथा हि दशाहं शावमाशौचमिति सामान्यप्राप्तदशाहबाध
पुरस्सरमेव त्र्यैकाहाद्यास्तताः शुद्ध्येदित्यादिविधायकं भवति बाधस्य चा
नुपपत्तिनिबंधनत्वाद्बाधावत्यबाधितेनुपपत्तिप्रसंगो न भवति ता
वदनेन बाधितव्यं अतः किं पदनेन बाधितव्यमित्यपेक्षायामपेक्षित
विशेषसमर्पणक्षमस्याभिर्वेदसमन्वित इत्यादिवाक्यशेषस्यादर्शे राम १०

नादग्निहोत्राद्यैकर्मणि स्वाध्यायादेश्च व्यावर्तिष्यते न पुनर्दानादावपि तथा वास्त
रास्य स्वाध्यायाध्ययनानि वर्त्यर्थ सद्यः शौचमिति शुद्ध्येद्विप्रो दशाहेनेत्ये
वमादिभिर्मन्वादिवचनैरेकवाक्यता भवति तथा च भवत्रदशाहातिकुल
स्यान्नं न भुजान इति दशाहपर्यंत भोजनादिके प[illegible]तिशेषधपाद्रिः वमा
दिवचनैरविरोधोपि सिध्यतीत्यतः क्वाचित्कमेवेदमशौचसंकोचोक्ते
कोचविधानेन पुनः सर्वसंव्यवहारादिगोचरमित्यलमिति प्रपंचेनेति
मिताक्षराकारस्य ह॥ हारलताकारोपि अपंचाशौचसंकोचो होमाध्ययनादि
एव न तु संध्यापंचमहायज्ञान्नैत्यके स्मृतिकर्मिच तन्मध्ये हापयेत

२१ दशाहांते पुनःक्रिया ॥ अस्य दशाहानि कुलस्यान्नं न भुज्यते दानं इति ग्रहो हि
ध्यायश्च निवर्तते इति जाबालवचनस्य मच वचनाभ्यां प्रतिषिद्धानां संध्यापंचम
प्रा० यज्ञमन्त्रिकाग्रहणमार्जनप्राणायामतर्पणगायत्रीजपतप्रधानक्रियारूपस्तानामकैनै
त्यकर्मस्मृतिकर्मके सान्नभोजनदानप्रतिग्रहकाम्यहोमस्वाध्यायानाम
प्यनुष्ठानार्थः अनेकवचनविरोधात् अतो वेदाग्निसंयोगादिना एकाहः अ
हादिभिः सर्वाशौचनिवृत्तिरिति व्यामोह एवेत्याह पारस्करगृह्यव्याख्याता राम
हरिहरमिश्रोप्येवमाह ॥ एवं च सिद्धाचार एवात्र शरणं यावज्जीवाशौच
दशमस्माह दक्षः व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा क्रियाहीनस्य मूर्ख २१
स्य

स्य स्त्रीजितस्य विशेषतः व्यसनासक्तचित्तस्य पराधीनस्य नि… नित्यशः श्र
द्धात्यागविहीनस्य भस्मांतं सूतकं भवेत् कदर्यो वृद्धदेवलेन परिभाषितः आ
त्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् लोभाद्यः पचिनोत्यर्थान् स कदर्य इति
स्मृतः अत्र सर्वदेति प्रत्येकमभिसंध्यते तेन सर्वदा व्याधितस्य सर्वदा ऋणग्र
स्तस्य मरणांतमशौचं भवतीत्यादि रघुनंदनेन उक्तं तत्र रत्नाकरः व्याधितस्य कर्मा
सामर्थ्यापादकव्याधिमत्त्वं ऋणग्रस्तस्य नित्यं धनिकासेवितस्य क्रिया
हीनस्य उपनयनादि क्रियाहीनस्य इत्यर्धमानत्वेनोपात्तम् मूर्खस्य गायत्री
स्य स्त्रीजितस्य भार्यावशतया गुरुनिर्भर्त्सकस्य व्यसनासक्तचित्तस्य

Indira Gandhi National
Centre for the Arts

१२ कालेप्यकार्य्यगतचित्तस्य पराधीनस्य श्राद्धादिकालेप्यनायत्तचित्त
त्यागविहीनस्य श्राद्धवेदनोचिते विषयमेवेति निष्कर्षः त्यागोत्राकस्यकश्च
शु० दि~~कालेप्यनायत्तचित्तस्यश्राद्धत्यागविहीनस्यश्राद्धवेदनोचित~~ ताम्यंराः
स्य सर्वदेति प्रत्येकमभिसंबध्यते तेन सर्वदाव्याप्तितादेव्नीशौचनिवृत्तिः प्रायश्चि
त्तेतरकर्मण्यनधिकार इति शुद्धिप्रदीपः इदं चाशौचं जननमरणनिमित्तकाद्भि
न्नमेव दशाम ब्रह्मपुराणे ॥ अन्यपूर्वा गृहे यस्य भार्यास्यात्तस्य नित्यशः
अशौचं सर्वकार्येषु गृहे भवति सर्वदा दानप्रतिग्रहो होमः सर्वं तस्य वृथा राम
भवेत् गेहे इत्युपादानात् यस्य गृहकृतमहत्कारिणी अन्यपूर्वा भार्या भव १२

ति तस्य ब्राह्मणादेः सर्वस्य सर्वदाशौचं भवतीति एवमेव रत्नाकरादयः शंखः हीनवर्णा
तु या नारी प्रमादात् प्रसवं व्रजेत् प्रसवे मरणे तज्जमशौचं नोपशाम्यति हीनवर्णाशूद्रा
प्रमदाप्रोगां घृतयाकृतसंगा तत तावमर्थ अपरिणीता शूद्रा यद्युत्तमवर्णेनारागकृ
तसंगमात् प्रसूतास्यात् तदा तत्प्रसवमरणयोः गर्भजनकस्य यावज्जीवमशौचमि
त्यर्थः अपराशौचसंकर तत्र कूर्मपुराणे अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीय
र सां मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् अघानाम् शौचानां विषमकालव्या
पकानां यौगपद्ये एकस्मिन् सत्यपरोयानिपाने अधिकादिनव्यापकेनाशौचे
ति तेन शुद्धिर्मैथिलाः अपवादमाह मरणोत्पत्तियोगे तु गरीयो मरणं भ
जननमरणाशौचसंकरे मरणाशौचमल्पकालव्यापकमपि गरीयः तेन

Indira Gandhi National
Centre for the Arts

१२ मरणनिमित्तकसद्यशौचाद्यशौचांतरोपनिपाते तेनैव जननाशौचं बाध्यं..
यसमानदिनव्यापकेव्यवस्थामाह ।। ब्रह्मपुराणे आद्यं भागद्वयं यावत्सू ।।
श्रु० तुसूतके द्वितीयेद्यतितेचाद्यात्सूतकात्शुद्धिरिष्यते अंत ऊर्ध्वं द्वितीयात्तु सूतकं।
तात्शुद्धिस्मृता ।। एवमेव विचार्यस्यात् मृतके मृतकांतरे अत्र चतुर्थांत्रिम
त्राशौचकालस्याद्यभागद्वयेयदिसमानदिनव्यापकं सजातीयमशौचांतरमा
न पतेत्तदा पूर्वाशौचव्यपगमेन शुद्धिः अग्रिमभागद्वये शौचांतरोपनिपाते अग्रि
माशौचव्यपगमेनैव शुद्धिः तत्रापि अशौचांतिमदिने अशौचांतरोपनिपाते विशे यम
षमाह विष्णुः रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेणेति अत्र रात्रिशब्दो होरा १३

त्रपरः रात्रिरहोरात्रः शेषोयत्र तत् त्रिशेषमशौचं तस्मिन्नशौचे शौचांतरोपनिपा
ते दिनद्वयेन शुद्धिः अवशिष्टाहोरात्रादधिकेन दिनद्वयेन शुद्धिः यदि त्व
शौचांतदिने न समे दिनद्वयं स्यात्तदा एकेन दिनद्वये शुद्धिरिति प्रभाते अशौचांता
त्येवं कुर्यात् ~~तदयमर्थः अशौचांतिमे होरात्रे यद्यपरं संपूर्णाशौचमापततितदा~~
~~पूर्वाशौचांतादधिकेन दिनद्वये शुद्धिरिति~~ प्रभाते अशौचांताहोरात्रशेषे सूर्यो
दयात् प्राक् प्राचीप्रकाशे वृत्ते संपूर्णाशौचांतरोपनिपाते सूर्योदयानंतरदिनत्र
येण शुद्धिः अत्रेदं च यदि दशरात्राः सन्निपतेयुराद्यं दशरात्रमशौचमित्यादि
वाक्येन परिशेषेरात्र संपूर्णसमानजातीयाशौचनिपाते व्यवस्था वि-
नेमेवं ब्रूयात् तदयमर्थः अशौचांतिमे होरात्रे यद्यपरं संपूर्णाशौचमापततितदा पूर्वाशौचांतादधिके २

Indira Gandhi National Centre for the Arts

१४ तथाहि गरीयसाल्पदिनव्यापकानां सजातीयानां वाध्यत्व विधानात ।

श्रु० यानां जननाशौचानामल्पदिनव्यापकेनापि मरणाशौचेन वाध्यत्वविधा॥

तप रिशेषेणा वाध्यं समानकालव्यापकं सजातीयं यत्राशौचद्वयं निप

तति तदेवं व्यवस्था विषम दिनव्यापक यो विजातीययोस्तु नेयं व्यवस्थात

त्र गरीयसैव व्यवस्थेति एवमेव रत्नाकरप्रभृतयः प्रसंपूर्णाशौचानां स

मकालव्यापकानां यौगपद्ये उत्तरेण शुद्धिः पूर्वव्यवस्थायाः संपूर्णाशौच

विषयत्वात् वर्द्धितेषु खण्डाशौच अखण्डाशौचे संपूर्णमशौचांतरं यदि निप राम

तति तदा घ्यहत्र्यहयो लघुत्वात् गुरुणा ग्निमाशौचापगमेनैव शुद्धिरि १४

तिप्रतिभाति दिनत्रयः परतः परतश्शुद्धिरघवृद्धौ विधीयते स्याच्चेत्पंचतमादह्नः पूर्वे

णाघ्यनुशिष्यते अस्यार्थः एकस्मिन्नशौचे सति तद्दिनांतर्गतदिनास माप्याशौचांत

रोपनिपाते पंचतमादह्नः परतः परेणाचेत् स्यादघवृद्धिस्तदा परतः परेणा संपू

र्णाशौचेनातीतेन शुद्धिः पूर्वेणाघ्यनुशिष्यत इति पंचतमादह्नः पूर्वेणातादशा

शौचांतरोपनिपाते पूर्वेणौवाशौचेनापगते च शुद्धिः एवं चेत्तदा वृद्धिः

राणीयवाक्यसमानार्थमेवेति मंतव्यं कूर्मपुराणे तु अघवृद्धिमदाशौच

र्ध्वं चेत्तेन शुध्यति अप्रयच्चेत्वं च मीराविमतीत्यपपत्तौ भवेत्

प्रथमाशौचादनंतरमघवृद्धिमत्साशौचं भवति तदा तेन प्र

१५
शुद्धिः अप्यचेत्त्र्यहं च त्रिरात्रिमतीत्य भवेत् तदा परतः परेण शुद्धिरि
शु० ब्रह्मपुराणकूर्मपुराणादेवत्रयवाक्यैकवाक्यतया विष्णुवाक्यमपि स
च प्रथमार्धविषये इत्यवसीयते तदाह विष्णुः जननाशौचमध्ये यद्यपर-
नं स्यात् तदा पूर्वाशौचव्यपगमेन शुद्धिः रात्रिशेषे दिनद्वयेन प्रभाते दिन
त्रयेण मरणाशौचमध्ये ज्ञातिमरणेप्येवं रात्रिशेष इत्यादि पूर्वमेव
१ व्याख्यातं बौधायन जननमरणयोः निपाते समाने दशरात्रयः अप्ययदिद
शरात्राः सन्निपतन्ते पुराणं दशरात्रमशौचमानवमात् दिवसात् समानेए
कस्मिन्दिने जनने जननान्तरस्य मरणान्तरस्य सन्निपाते दशरात्रेणैव न शु० १५

न्यूनेनाधिकमशौचं व्यवकृष्यं दिनांतरे आनवमदिवसात् यदि दशरात्रा सन्निपते
पुराणं दशरात्रमशौचं स्यात् अयं सामान्यविधिः ब्रह्मपुराणैकवाक्यतया
पंचमदिनानन्तरं सपिण्डाशौ पनिपातो बाधकेनापोद्यते एवमेव यावा ह
क्यं तराविरोधोप्यूह्यः अत्रं च प्रकरणे पंचमपदं संपूर्णाशौचापेक्षया केन
वमपदं संपूर्णाशौचोपांत्यदिनपरं दशरात्रपदं संपूर्णाशौचोपलक्षकं
यमत्र प्रघट्टवशौचं तु पक्षिमेन समाप्यते एतदसंपूर्णाशौचानां
सन्निपाते ज्ञेयं लघुहारीतः सूतके मृतके चेत्स्यात् मृतके सूतकं त्वपा त
मृते न सूतकं गच्छेत् नेतरन्न सूतकेन तु तदेवावस्यादशाहशौचे

Indira Gandhi National Centre for the Arts

२६ पंचमदिने पर्यंत पाद्द्वितीयस्य जातो यदि दशाहाशौचमापतति तदा पूर्वाशौचव्य
शु० पगमेन शुद्धिः पंचमदिनानंतरं नवमदिनपर्यंतं द्वितीये अशौचे सत्यग्रिमाशौचव्य
पगमेन शुद्धिः दशमदिने संपूर्णाशौचांतरे सति तद्दिनानंतरं दिनद्वयेन शुद्धिः दशम
दिनरात्रशेषे अरुणोदयवेलायां संपूर्णाशौचांतरे शवक्षत्रियवैश्यशूद्राणां संपू
र्णस्वस्वाशौचपूर्वार्द्धसंपातदिनव्यपक्रमशौचांतरं यदि भवति तदा पूर्वाशौचव्य
पगमेन शुद्धिः अग्रिमार्द्धे अग्रिमाशौचव्यपगमेन शुद्धिः अशौचांतदिने अ
शौचांतरोपनिपाते सर्वेषां तद्दिनानंतरं दिनद्वयेन शुद्धिः अशौचांत्यदिनशेषप्रभा राम
तकाले शौचांतरोपनिपाते अधिकेन त्र्यहेणाशुद्धिस्त्रिहायसंपूर्णाशौचे समका १५
दि

लाशौचांतरोपनिपाते अग्रिमाशौचव्यपगमेन शुद्धिः सूतकाभ्यंतरे मरणोपनिपाते म...
वासति सूतकोपनिपाते मरणाशौचापगमेनैव शुद्धिः एवं च कुलप्रयुक्ताशौचे व्यवस्था
यत्तु स्त्रीणां स्वप्रसवनिमित्तमशौचं तत्प्रातिस्विकं तदन्ये न बाध्यते तेन स्त्रीणां यतिमर
णेऽपि पुत्रजन्मनि विंशतिदिने अप्यूर्ध्वं कन्याजन्मनि मासादूर्ध्वं आचायदर्शार्थं दे
वार्थी पाकादिकर्मणि चाधिकारः एवमेव प्रामाणिकव्यवहारः अत्र पित्रादिम
रणे अशौचांतरोपनिदर्शितो हारलताभिताक्षराभ्यां सतु रत्नाकरादिषु दर्शनाभावा
दुपेक्षः ॥ अथ विदेशस्थाशौचं तत्र मनुः विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दश
शं यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् अतिक्रांते दशाहे तु त्रिरात्रमशुचि
पाते विशेषो

Indira Gandhi National
Centre for the Arts

...त्सर संवत्सरे व्यतीते तु स्यष्टैवापि विशुध्यति यद्दशामरणोत्पत्तिर्नेनज्ञानप्राप्तासन्निदे
श: तत्र विगतं विनष्टं अनिर्दशमनतीतदशाहेय: पुरुष: शृणुयात्तस्य यच्छेषमव
३० शिष्टं तावदेवाशुचिर्भवेत् अतिक्रांतेऽतीते दशाहे त्रिरात्रमशुचिर्भवेत् संवत्सरे अ
तिक्रांते स्पृष्ट्वैव स्नात्वैव शुध्यति अत्र अनिर्दशमिति दशाशब्द: सपिंडाशौचोप
लक्षक: दशरात्रदशाहशब्दावपि संपूर्णाशौचोपलक्षकौ ।। तेनायमर्थ: विदेशस्थस
३ पिंडमरणे श्रवणे शौचकालानपगमे यावदवशिष्टमशौचकाल: स्यात्तावदा
चं शौचं तु निर्वर्त्य: कर्तव्यं अतिक्रांते तु संपूर्णाशौचकाले त्रिरात्रमशौचं कर्तव्यं व
र्षानंतरं सपिंडमरणश्रवणे स्नानमात्रेण शुद्धि: एवं चैतदेकवाक्यतया स्वे स्वे एम
ए निव्यतीते तु त्रिरात्रमशुचिर्भवेदित्यत्र सस्वाहयदं चातुर्वर्ण्ये शौचकारः १७
संपूर्ण

क्रमे त्रिरात्रम विशेषेणैवेत्यर्थ:

रमेव तेन त्रिरात्रादावशौचकाले व्यतीते ज्ञात्यादिमरणाशौचाभाव एव य
दि तु स्वे स्वे एनिनीतिय स्यदाभानशौचकालस्तदति ~~क्रमे त्रिरात्रमविशेषेणैवेत्यर्थ~~: स्या
त्तदेकाहाशौचातिक्रमेऽपि त्रिरात्रं स्यादेवं सति न्यायसिद्ध आगमिकश्चाशौचातिक्रमे शौ
चापकर्ष: ।। साधु समर्थित: स्यात् तस्मादसंपूर्णाशौचे कालादावतीते स्नानोदकदानेवत
था च याज्ञवल्क्य: प्रोषिते कालशेष: स्यात्पूर्णे दत्त्वोदकं शुचिरिति पूर्णाशुशौचकालइ
त्यर्थ: अत्रोदकदानेन स्नानमप्याक्षिप्यते प्रेतोदकदानस्य सर्वत्र स्नानपूर्वकत्वात्
मनुर्निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च सवासा जलमाप्लुत्य शुद्धो भवति मानव: अ
त्र निर्दशं निःक्रांताशौचकालमित्यर्थ: तेनैतदपि त्रिरात्राद्याशौचातिक्रमविषयक

Indira Gandhi National
Centre for the Arts

१८ वोढव्यं सपिंडमरणे एवं दशाहानंतरं श्रवणे विशेषमाह गौतमः श्रुत्वा चोर्द्ध्वं दशम्याः पक्षि
णी ति दशम्या अशौचांतरात्रेरूर्ध्वं सपिंडमरणं श्रुत्वा पक्षिणी ~~अशौचांतरात्रेरूर्ध्वं सपि~~
~~ण्डमरणं श्रुत्वा पक्षिणी~~ अशौचकालः पुरुषस्य भवति पक्षिणी आगामि वर्तमान
दिनद्वयसहिता रात्रिः तुल्यतया पूर्वापरा त्रिसहितं दिनं वा देवलः । अशौचाहःस्वती
तेषु बंधुश्चेच्छ्रूयते मृतः तत्र त्रिरात्रमशौचं भवेत् संवत्सरांतरे ॥ ऊर्द्ध्वं संवत्सरादर्वाक् श्रूय
ते चेन्मृतस्वकैः भवेदेकाहमेवात्र तच्च संन्यासिनो न तु नाशुच्यं प्रसवस्यास्ति व्यतीते
ष्वदिनेष्वपि तत्र गौतमोक्तपक्षिणी संवत्सरादूर्द्ध्वं व्यवतिष्ठते तत्पूर्वं देवलेन त्रि रात्र
रात्राभिधानात् देवलोक्त एकाहस्तदुपरिमासत्रये व्यवतिष्ठते तदयं सर्वैर्व्यवस्थापितार्थः ।

व
अनतीताशौचकालं यदि विदेशस्थस्य सपिंडमरणं श्रूयते तदा यावदशिष्टमाशौचका
लमस्पृतानदाशौचं कर्त्तव्यं यदि तु संपूर्णाशौचस्य काले तीते षण्मासाभ्यंतरे सापिंडम
रणं श्रूयते तदा त्रिरात्रं तदूर्द्ध्वं नवममासपर्यंतं पक्षिणी तदूर्द्ध्वं वर्षं यावदेकमहोरात्रम त्र
शौचं वर्षानंतरं स्नानमुदकदानं च आशौचादावतीते सर्वदैव स्नानोदकदा
नमोत्र जननाशौचकालेत्वतीते जननश्रवणे सर्वदा अशौचाभावः अत्रापि
त्रादीनां विदेशस्थानां मरणश्रवणे मिताक्षराकारलताभ्यां विशेषो न लक्षितः
सत्तुरत्नाकरादिभिः लिखितत्वादुपेक्षितः महार्णवधादिव्यवहृतदेशांतरमृतस्य
मरणश्रवणे सद्यःशौचं तथा च पैठीनसिः देशांतरमृतस्य सद्यःशौचं अत्र दे
शांतरं परिभाषितं अत्र बृहस्पतिः देशांतरं वदंत्येके षष्टियोजनमायतं च

तर

८९

श्री त्वारिंशद्दं तयेके त्रिंशदेके तत्पैवच ॥ कच्छ मनुरप्याह । वाचोयत्र विभिद्यंते गिरिर्वा
व्यवधायकः महानद्यंतरं यत्र तद्देशांतरमुच्यते ॥ देशनामनदीभेदात्निकटेपि
भवेत्तु यत् । तत्तु देशांतरं प्रोक्तं स्वयमेव स्वयंभुवा । देशान्तरेण या वार्ता यत्र न श्रूय
ते यवा ग्रत्र नानाकल्पेष्वनन गत्या न व्यवस्था यं । तेस्माद्व स्योच्यते ग्रत्रो
त्सर्ग तस्तावतः षष्टियोजनानंतरं यत्तु चत्वारिंशत्योजनानेतस्य त्रिंशद्योजना
नंतरस्य च देशांतरत्वमुक्तं तद्भाषाभेदेपि गिर्यादि व्यवधाने सति योजननियमाभा
वदर्शयितुं ॥ तेनायमर्थः षष्टियोजनाभ्यंतरेपि यत्र भाषाभेदो गिरिर्महा
नदीव्यवधानं वास्ति तत्र तावतैव देशांतरत्वं न तु योजननियमापेक्षा एतद्वि राम
षयावेव दिमनुवचनं । तच्च स्वयमेव विवृणोति स्मा देशनामनदीभेदादित्यादिना १८

॥ गिर्यादिव्यवधानाभावे तु नियमार्थमाह दशरात्रेणेत्यादि तेन गिर्यादिव्य
वधानाभावे यत्र साधारणदशाहाभ्यंतरे न श्रूयते तद्देशांतरं ॥ एतदपि पुरुषव
शात्तु पेद्यम् । व्यवस्थितमतः षष्टियोजनानंतरोपलक्षकमेव तावद्देशस्य दे
२ शांतरत्वोत्सर्गः पुरुषेसागं तु मशक्यत्वात् । अतएव गिर्यादिसमुदायव्यवधा
नाभावेपि शास्त्रीयषष्टियोजनानंतरे प्रयागे मृतस्य तीरभुक्तिदेशस्थितं । प्र
ति देशांतरमृतत्वव्यवहारः प्रामाणिकानां ॥ सत्यपि च त्रिंशद्योजनानंतरत्वे गि
र्यादिव्यवधानाभावात् काश्यां मृतस्य तीरभुक्तिदेशस्थितं प्रति न देशांतरमृतत्व
व्यवहारः गिरिर्वेति वा शब्दः समुच्चये तत्रायमर्थः षष्टियोजनानंतरो देशो
देशांतरं षष्टियोजनाभ्यंतरेपि यत्र भाषाभेदः गिरिनदीव्यवधानाभ्यां निम

थै२

Indira Gandhi National
Centre for the Arts

अशु वंतितदपि देशांतरं तस्मिन देशांतरे मृतस्य सद्यः शौचं ॥ अथवा लब्ध अशौचं तत्र
याज्ञवल्क्यः ॥ प्राक्तु जननात् सद्यं आचूडान्नैशिकी स्मृता त्रिरात्रि माव्रतादे
२० शाहं शरात्रमतः परं नैशिकी अप्रसुप्तिः ॥ अहोरात्रमशौचमित्यर्थः ॥ अत्र दंत
जननेन शब्देन दंतजन्मकालो लक्ष्यते स च सप्तमो मासः दंतजन्म सप्तमे मासो त्यु
पनि पनिवद्दर्शनात चूडाशब्देनापि चूडाकालो लक्ष्यते स च ततीयं वर्षे तृतीय
चाप्रतिहत इति चूडाविधानात् ॥ अत्र यद्यपि सांवत्सरिकस्य चूडाकर पै
णमिति प्रथमवर्षे विधानं मप्यस्ति तथापि विप्रेन्यूने त्रिभिर्वर्षैरित्या राम
दिवाक्येन द्वितीयवर्षे समाप्ति यावत् नैशिकी विधानात्तदेकवाक्यत
यात तीयाद्वर्गवर्गं त्यते चूडाकालः ॥ औत्सर्गिक स्तृतीयाब्दः प्रथमा

द्वे तु कुलधर्मवशाद्यवादत चूडाकरणमिति हारलता ॥ व्रतं उपनयनं तेना
पि स्वकाल उपलक्ष्यते ॥ स च षडवर्षानंतरं गावकालः पर्यवसितः तच्च ब्रह्म पं
पुराणे द्विजन्मनामयं कालस्त्रयाणां तु षडाब्दिके इति स्पष्टमेव ॥ मैथि
म दाचार्याः तेन सप्तमासमवधीकृत्य बालमरणे सद्यः शौचं सप्तमासमा
रभ्य द्वितीयवर्षसमाप्ति यावदेकाहोरात्रं ततः षष्ठवर्षं व्याप्य त्रिरात्रं त
दनंतरं दशरात्रादिकं स्वस्व जात्युक्तं ब्राह्मणादीनां त्रयाणां क्षत्रियाणां वि
न शेषो मविष्यति अनीपनयने कालव्यवस्थापनात् बालस्यापुंस्त्व विवक्षि
तं तेन कन्यानां मरणे नेदमशौचं तत्र विशेषो वक्ष्यते पारस्करः ॥ अंतः सूतके
चेदाद्दुत्थानादाशौचं मतं न लान्नोदक कर्म अस्यार्थः अंतःसूतके सूत

Indira Gandhi National
Centre for the Arts

श्यु० मातरे चेद्यात्नो विपद्यते तदा आउत्थानात् दशमदिनं यावदशौचं भवति इदं च
२१ आउत्थानादित्यभिधानान्मातुरेव अन्ये बांधवास्तु पुनीतः सद्यः शौचमेव त्र
पत्य मात्रमरणाचेह विवक्षितं विशेषानुपस्थापनात् अंगिरा विप्रेश्नन्येत्रि
भिर्वर्षैर्मृतेष्वशुद्धिस्तु नैशिकी घाहमक्ष त्रियेष्वशुद्धिः त्रिभिर्वर्षैर्मृते सति
॥ निर्वृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते निर्दतेस्य त्र्यहाद्विवैश्ये नवभिरेव च ॥ ये
त्रिभिर्वर्षैर्न्यूनइत्यत्र त्रिभिर्वर्षैरुपलक्षिता तान्पूर्णेऽसंपूर्णी द्विवर्षइत्यर्थः
निर्वृत्तचूडइति निर्वृत्ताचूडा विहिता यस्येति निर्वृत्तचूडाकः शेषं सुबोधं राम
ब्रह्मपुराणे अनुपनीतो विप्रस्तु राजा चैवाधनेकम्यहात् श्रगृहीतप्रतोद
स्तु वैश्यः शूद्रस्त्ववस्त्रकुरुम्रियते यत्र स्पा[illegible]ताः दशौचं त्र्यहमेवाहिदि

तत्र

त्रिः

वेदाग्निमतोरेव अन्येषां षडहर्न्नवाहो हर्वीर्क्तेः ॥ एवमेव हारलताकारः । शूद्रस्यापि पंचाद्यभ्यंतरे त्रिरात्राभिधान
जन्मनामयंकालस्त्रयाणां तु षडाह्निकः पंचाब्दकस्तु शूद्राणां स्व जात्युक्तमतःय च्छू
रें अप्रत्रक्षत्रियुवैश्यपवोम ऽब्दाभ्यंतरे त्रिरात्राभिधानं स शूद्र विषयं इत्यमेव हा
रलतारत्नाकरौ सशूद्रास्तु विशेषाशौचे एवं दर्शितायदपि अनूढानां तु न्याक
रत्नेतारत्नाकरौ सशूद्रास्तु विशेषाशौचे एवं दर्शितायदपि सच्छूद्रे विषयमेव
ञ्य नांतथा वैशूद्र जन्मना मितिशूद्रस्य त्रिरात्राभिधानं तदपि सच्छूद्रे । विषयमेव
सामान्यतस्तु शूद्राणामंगिरोवाक्येनैव व्यवस्था तथा शूद्रे द्विवर्षान्यूने
तु मृते शुद्धिस्तु पंचभिः अतऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते षड्वर्षांत
मतात स्तु शूद्रः संम्रियते यदि मासिकं तु भवेच्छौचमित्यंगिरसमाप्तितः
वत् षड्वर्षपर्यन्तं मासिकाशौच विधानं विवाहित शूद्र विषयं अविवा
हित षोडशा वर्ष यावत् द्वादशाहः तदनंतरं मासिकमेवाशौचं तथा च शंखः

स्य शौ

Indira Gandhi National
Centre for the Arts

प्र

अनन्तर्भावः शूद्रस्तु षोडशात्वत्सरात् परं मृतः समधिगच्छेच्चेन्मासं तस्यापि
बांधवाः शूद्रि समाधिगच्छति नात्र कार्या विचारणा तदेषामस्मात्खंडलके
२६ न पूर्वस्याप्रसूतानां सप्तमासात् प्राक् बालके मृते सद्यः शौचं सप्तमासादार
भ्य द्वितीयवर्षसमाप्तिं यावत् एकमहोरात्रमशौचं तृतीयवर्षादारभ्य षड
वर्षं यावत् त्रिरात्रं तदुपरि दशाहशौचं भवति क्षत्रियाणां सप्तमासात् प्राक् स णां
द्यः शौचं तदनंतरं द्वितीयवर्षं यावत् द्व्यहं तृतीयवर्षादारभ्य षड्वर्षं याव
श्री त् षडहः तदुपरि द्वादशाहमशौचं भवति वैश्यानां सप्तमासात् प्राक् सद्यः शौचं ।। राम
तदनंतरं द्वितीयवर्षं यावत् त्र्यहं तदुपरि षड्वर्षं यावत् नवाहं तदुपरि
पंचदशाहमशौचं भवति शूद्राणां सप्तमासात् प्राक् सद्यः शौचं सप्तमासादारभ्य

द्वितीयवर्षसमाप्तिं यावत् पंचाहं तृतीयवर्षादारभ्य षोडशवर्षं यावत् अविवाहितमृते
द्वादशाहं तदुपरि मासमाशौचं भवति विवाहिते षड्वर्षादेवोपरि मृते मासमाशौचं
भवति येषां शूद्राणां द्विजोच्छिष्टभोजनं द्विजशुश्रूषा मासमासमुंडनं च ते सच्छू
द्रा तेषां सप्तमासादारभ्य पंचमवर्षं यावत् मृते बाले त्रिरात्रं तदुपरि षोडशव
र्षामासमासमुंडनं च ते सच्छूद्रा तेषां सप्तममासादारभ्य पंचमवर्षं यावत् मृते बाले
त्रिरात्रं तदुपरि षोडशवर्षाणि यावद् अविवाहितमृते द्वादशाहं तदुपरि पंचदशाहमशौ
चं विवाहिता विवाहिते साधारणं प्रसूतिकानां तु सर्वासामेव दशाहाभ्यंतरे वा समं
रणे यावद्दशाहः पूर्यते तावदशौचं भवति अत्र सर्ववर्णानां संपूर्णो द्विवर्षो वा
ह

Indira Gandhi National
Centre for the Arts

प्र०
23

सेम्तोभ मौनिखननीयः अग्निदाहं तस्य न कर्तव्यं यदि तु प्रमादादिना तस्य अ
ग्निदाहः क्रियते तदा ब्राह्मणानां त्रिरात्रं क्षत्रियाणामेकादशाहं वैश्यानां द्वादशाहं
शूद्राणां विंशतिरात्रमशौचं भवति तथा च ब्रह्मपुराणे ऽप्रनतितेति द्विवर्षसु तो पै
य चापद्यते श्रुतिमोहासि मृते मृदेशसाधु स्यमाद्दधात अशौचं ब्राह्मणा
नां तु त्रिरात्रं तत्र विधते राज्ञामेकादशाहं तु वैश्यानां द्वादशाहिकं अपि विं
शतिरात्रं तु शूद्राणां भवति क्रमात् अथ स्वशौचं ब्रह्मपुराणे आजन्मनस्तु चू
डांतं यत्र कन्या विपद्यते सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ततो वाग्दान राम
पर्यंतं यावदेकाहमेव हि अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः वाग्दान
२२

कृते तत्र ज्ञेयं चोभयतस्त्र्यहं पितुः वरस्य च ततो दत्तानां भर्तुरेव हि स्वजात्युक्तमशौचं स्यात्सू
तके मृतके पि वा अतः परं अकृतवाग्दानावस्थातः प्रवृद्धानां प्राधिकरूपाणां इत्यर्थः अधि म
प करूपं च्यतीकरोति वाक्प्रदाने कृते इति उपतइ विध्यं करोति पितृवरस्य चेति वरस्य भर्तुरित्यर्थः त
तो दत्तानां विधिपूर्वं दत्तानां भर्तुरेव स्वजात्युक्तमशौचं भवतीत्यर्थः एवमेव कारलतायत्तं वाग्दा
नन भवति तत्र चूडानंतरं विवाहपर्यंतमेकाहमेवाशौचं भवतीति तथा च याज्ञवल्क्यः अहस्त्वदत्तकन्या
सु बालेषु च विशोधनं अस्यार्थः अदत्तकन्यासु मृतासु बालेषु च जातदंतेषु मृतेषु त्र्यहमेकमहो
रात्रमशौचं भवति अयमत्र समुदायार्थः सर्ववर्णानां द्वितीयवर्षांतं यावत् कन्यामरणे सद्य
शौचं तदनंतरं विवाहपर्यंतमेकाहोरात्रमशौचं विवाहानंतरं पितृकुले अशौचं न भवति स्वा
मि कुले संपूर्णाशौचं भवति यत्र तु मर्यंतु मासे यादातव्येति वाग्दानं क्रियते तत्र चूडानंत

श्रु०
२४

रम्ता यांतस्यां विवाहश्चर्यंतं पितृपक्षयोः पक्षिणी त्रिरात्रमिति विशेषः विवाहितासु विशेषमा
हत्र्यहमपुराशौचज्ञानाः पितृगेहे स्वयं ते म्रियते यथा त्वमशौचं चरे सम्यक् पृथक्स्थाने प्यव
ष्यि तातं दंधुवर्गः स्वकेन शुध्यते जनकस्त्रिभिः अत्र जनकस्त्रिभिरिति जनकशब्देन ज
ननकर्तृत्वोपलक्षणात् जनन्या अपि त्रिरात्रेण शुद्धिः तथा हि सिद्धवत्सपारिजातरत्नाक
रयोः माता पित्रोस्त्रिरात्रमित्युक्तं हारलताकारेणापि तथैवोक्तं पूर्वके म स्रो विबंधुवर्ग इत्य
त्रापि वर्गशब्देन एकक्रियायत्नाएकाश्रमस्य भ्रातृवे मात्रे पावितव्यत तु त्रास्ते षांपु
ह त्रा अग्र मस्यतेते षामेकाहः अतएव सिद्धवत्सपारिजातहारलातार त्नाकरेषु भ्रात्रादी पम
नामेकाह इत्युक्तं पितृगेहे तिमनाभिगृहोपलक्षणं जगृहे सपिंडमरणे पितत्र
तत्राशौचं श्रवणादत्रापि भ्रात्रादि गृह मरणमपि विवक्षितं मरणमाह चर्यादत्त २६

ख्या
जननमपि तादृक्कात्र लभ्यते एतच्च पारिजातस्यानुमतमेव तथा हि तेन निजव्याख्याने विश ३
बमतमभिधाय पितृगृह इति पितृशब्दस्य विवक्षितत्वेन भ्रात्रादिगृहे निवसंत्याः प्रवेमरणे स्वस
त्यशौचं न भवतीति प्रकाशकारस्तु त्पुत्रमतः प्रकाशकारस्य मतमेतन्न मन्नमते पितृशब्दस्यावि
क्षितं किंत्वशौचभागिगृहे विवक्षितमिति तस्यार्थो वर्गमाते विशेषाविनाभिधानात् रत्ना
करस्वरसोप्येव व्यक्ष्यत इति तदियमत्रव्यवस्था विवाहिता स्त्री यदि पितृगृहे सूयते म्रि
यते वा तदा माता पित्रोस्त्रिरात्रमशौचं एकाभवासिनां भ्रातृवैमात्रेय पितृव्यापु
त्रादीनां तत्पुत्राणां पितृव्यस्य चैकरात्रं पितृभिन्नो भमवासिनां त्रीदीनाम शौचं भ्रा
न च भवति पितुरभावे मातृगृहे दुहितुर्मरणे प्रसवे वा मातुस्त्रिरात्रमेव मातु
रभावे भ्रातृगृहे भगिन्या प्रसवे मरणे वा भ्रातृदीनामेकरात्रमेवाशौचं
दे

Indira Gandhi National
Centre for the Arts

यां २

२५ भवति तथापि वाग्दत्तानुया कन्या स्वातंत्र्यादन्यमाश्रिता यं यं श्रितवती भूप
शु० स्तस्याशौचं ग्पहि ऽपहृत ताया वा मस्कृ तानान्येषामिति निष्कृयः कामादत्त
तपोनिष्ठाद् अन्यं गत्वा यदा स्थिता तस्यान्यस्य गोत्रा साद्यं त्वाश्रितवती स्व
यं प्रस्थापि : विवाहिता स्त्री पाणिग्राहकादन्यं यं पुरुषमाश्रयति तस्यैव पु
रुषस्य तस्या मातायां प्रसूतायां वा त्रिरात्रमशौचं भवति स्वयं ग्राहके कुत्र जाता
नामशौचं तत्र न भवति यदि च पाणिग्राहके गते तस्याः संगमः कृतेस्तद्गतस्याः पा
त णिग्राहकगोत्रमेव तिष्ठति स्वयं ग्राहके गोत्रं न भवति यदि तस्यास्तत्संगमो न वृ पाम
त्तस्तदायमेवाश्रितवती भवति सैवान्यस्यान्यगोत्रा सा भवति अशौचं तत्रापि त्र
हमेव तथा यद्यतुसत्र मेयत्रैव बलात्कारेण कृता भवेत् स्वामिगोत्रं भवेत्तस्यास्तत्र भ
पो विशिष्यते पैतृकं त्वप्रसूतायां तथा तःपो विकि भर्तृकं ऽप्रस्थापि : पाणिगृहीतो

ढ्रे ऽसमाप्ते सप्तपदीसमारोहे यो या बलात् हृता ऽन्यमाश्रिता भवति तस्याः स्वा
मिगोत्रं पाणिग्राहकगोत्रमेव भवति तत्रापि विशेषमाह तत्र भूपो विशिष्यते।
भूपः पुनस्तद्गोत्रे विशिष्यते विभज्यते ऽत्य थः विभागमाह पैतृकं त्वप्रसूतायां
मित्यादि तस्या बलात्कारहृतायां यावत्प्रसवो न भवति तावत् पितृगोत्रमेवाव
तिष्ठते प्रसवानंतरं यो विकिस्य भर्तुः पाणिग्राहकस्यैव गोत्रमेव तिष्ठते बलात्का
रहृतं गोत्रं कदापि न भवति तस्या इति प्रशौचे तत्प्रसवमरणयोस्त्रिरात्रमेव हर्तुरि
ति शेषः पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता प्रसवे मरणे तज्जमशौचं नोप
स्त्र्य शाम्यति पितृ रिक्ति शेषः इति अशौचं अथ गर्भस्रावाशौचं तत्र पुराणे यावत्मासा भव
तैर्यावद्गर्भस्रावो भवेद्यदि तदा मास समैस्तासां दिवसैः शुद्धिरिष्यते ऽतऊर्ध्वं
स्वजात्युक्तमशौचं तासां निगद्यते सद्यः शौचं सपिंडानां गर्भस्य पतने सति अ

Indira Gandhi National
Centre for the Arts

स

त्रदिवसैरिति न ऊर्ध्वं वर्णान्मासानां वक्तुं संयत प्रभृति यं भवति तत्त्रैये याव
त्स्यात्तेन तत्तो यमासो परमर्दुमा पर्यंतं यावतो मासा अतीतास्तावंति दिनानि ता
२६ सांस्त्री णां ब्राह्मण्या दृनाम शौचं भवति सपिंडानां स्नानमित्र पूर्व प्रभृतीनां सद्यः शौचं
मासत्रयाभ्यंतरे विशेषमाह मरीचिः गर्भस्रुत्याय थामासमचिरेत्तु तेमेऽस्पहे राजन्ये
तु चतूरात्रं वैश्ये पंचाहमेव चाऽप्रष्टाहेन तु शूद्रुस्याशुद्धिरेषाप्रकीर्तिता यथामास मि
ति यावंतो मासा अतीतास्तावंति दिनानि व्या व्याशौचे रात्र चमासत्रयादूर्ध्वं षड्मा
त संयावत् मासत्रयाभ्यंतरे त्वाह ॥ अचिरे तु मेऽस्पहामिति अचिरे मासत्रयाभ्यंतरे ग
उत्तम र्भस्रावे सति उत्तमे ज्ञातीये ब्राह्मणानां त्रियाशौचंत्रिरात्रं चतुरात्रं वैश्यानां पंचा
हं शूद्राणामष्टाहमशौचं भवतीत्यर्थः ॥ कूर्मपुराणे गर्भच्युतावहोरात्रं सपिंडे
त्यंत निर्गुणे । ध यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः ॥ अत्यंत निर्गुणोऽपि वेदैक राम
देशावेदांगस्वक्रियाभ्रष्टैरकाहः यथेष्टाचरणो सर्वदा शिवत्वसर्वविक्रयित्वादि ॥

सति त्रिरात्रं ॥ एवमेव रत्नाकरश्चितेता ॥ यदपि त्रिरात्राशौचं हारीतेनोक्तं जातमृते मृते वा
ते वा कुलस्येति तदपि यथेष्टाचरणो ज्ञाति विषयमेवमेवरत्नाकरः ॥ जातमृत इ
ति जन्मांतरमव्यवहितकालमृतस्यार्थः तद्दर्थं जातमृतोसर्वेषामेव सपिंडानां
सद्यः शौचं ॥ एवं च गर्भस्रावे सपिंडानां जातेनां सद्यः शौचं तदेषः समुदायार्थः ग
र्भस्रावे मासत्रयाभ्यंतरे ब्राह्मणपत्नि त्रिरात्रं मासत्रयो परिषण्मासं यावत् यावत्सु मासे
ष्वतीते षु गर्भस्रावो भवति तावंत्येव दिनान्यशौचं ॥ षण्मासो परि दशाहमशौचं
भवति ॥ पति पुत्रादिसापिंडानां सद्यः शौचं भवति दोत्रियायामासत्रयाभ्यंतरे दि
नचतुष्टयं । वैश्यायां पंचाहं तदुपरि षण्मासं यावत्तु भयोः पित्र तीत्यमाससमसंख्या
स्व्यानि दिनानि तदुपरि क्षत्रियोत्पुत्रं द्वादशाहं पंचदशाहं चाशौचं भवति शूद्राणामा
सत्रयं यावदष्टाहं ततः षण्मासं यावत् अतीतमाससमसंख्यानि दिनानि तदुप
रि मासमशौचं भवति अत्र सर्वत्र निर्गुणासपिंडानामेकाहं यथेष्टाचरणानां सपिं

Indira Gandhi National
Centre for the Arts

शु० त्रानां महाशौचं विज्ञेयं अथ मत्तु विशेषाशौचं प्रारभ्यते । वृद्धगार्ग्यः वृद्धः शौचस्म
२७ र्तेर्लुप्तः प्रत्याख्यातभिषक्क्रियः आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः तस्य त्रि
रात्रमाशौचं द्वितीये त्वस्थिसंचयः तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् अत्र शौचे
स्मृतेर्लुप्त इत्यत्र वृद्धो मृतो वा यः शौचं कर्तुं न शक्नोति अनुभूतार्थ स्यात्विरेणैव स्मृति
भ्रन्यः एवंविधो भृग्वग्न्यादिभिरात्मानं घातयेत् भिषजा वैद्येनाप्रतिक्रियरोगग्र
पुरुष आत्मानं घातयेत् तत्रात्मघाते दोषाभावः त्रिरात्रशौचाचरणं तथोक्तं ब्रह्मग
र्भः वृद्धपुराणे । दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि प्रविशेत् ज्वलनं दीप्तं करोत्य
नशनं तथा अगाधतोयराशिं च भृगोः पतनमेव च भृगोः पर्वतादित्यर्थः । गच्छेन्महा
पथं वापि तुषारगिरिमादृतः प्रयागवटशाखाग्राद्देहत्यागं करोति यः स्वयं देहविना राम
शेतु प्राप्ते काले महामतिः उत्तमान् प्राप्नुयाल्लोकान् नात्मघाती भवेत् क्वचित् । महा

पक्रियः स्वर्गादिव्यान् लोकान् समश्नुते । एतेषामधिकारस्तु तपसो सर्वजंतुमानराणां
मध्यनारीणां सर्ववर्णेषु सर्वदा ईदृशं मृतं केषां जीवतां कुत्रचिद्भवेत् । अशौचं स्यात्त्र
हतेषां च ज्ञानतः कृते तथा सहामतिरिति स्वयं देहविनाशे उपस्थिते । अन्यथापि रोगो
णां संप्रत्येवमन्यमतः सात्विकतया स्वयमेवैतेषु स्थानेषु देहं त्यजामिति हि तिवु
द्धिः महापापवर्जिय इति महापापवर्जितो पीत्यर्थः तेन महापापाद्यावं कृतमरणो द्व्या प्रि
ल्लोकान् समश्नुते । किंभूत धार्मिक इत्यतिशयप्रदर्शनं । एतेषां मरणरूपाणां तेषां
सर्ववर्णेषु सर्वव्यक्तिसाधारणोऽधिकारः ईदृशमित्यादेरयमर्थः एवंविधमरणप्रवृत्ता
नां देववशात्तत्काले जीवतां कालान्तरे मृतानां त्रिरात्रमेवाशौचं च तत्त्वेवं मरणे
त्रिरात्रमित्यपि त्रिरात्रमेव च ज्ञानतः कृते तथेति एतद्व्यवं विधेषु प्रायश्चित्तेषु च
ज्ञानतः कृतेषु त्रिरात्रमिति दर्शयति प्रायश्चित्तं इति तु कश्यपवाक्ये कवाक्य

Indira Gandhi National Centre for the Arts

४०
२८ तथा लभ्यते अग्निमापादयेद्यथा मानं स्वयं योऽन्यद् उदकादिना विहितं तस्य नाशौचं नाग्नि
भिना युदकक्रिया यस्तु रोगादिना अमत्या निमित्तमात्मानं घातयति तस्याशौचाग्निदाना
दिक्रियानकर्तव्या अथ यः कश्चित् प्रमादेनाम्रियते न्युदकादिषु तस्याशौचं विधातव्यं
कार्यो चास्योदकक्रियं प्रमादेनानवधानेन यो म्युदकवज्राग्न्यमृत्युहेतुभिर्म्रिय न्यु
ते तस्य संपूर्णमशौचं कर्तव्यं संकोचे प्रमाणाभावात् उदकक्रिया कर्तव्या । अग्निसं
स्कारोदकदानादिकाक्रिया कर्तव्या इत्यर्थः उदकक्रियेत्यस्योपलक्षकत्वात् तदेवमत्रसमु
ध दायार्थः शौचाचमनाघसमर्पणस्य अस्माद्यमाभिगृहीतस्य च पुरुषस्य मरणे वा याम म
अ ग्निजलप्रवेशेन मरणे सपिण्डानां त्रिरात्रमशौचं तत्कालेऽग्न्यादिप्रवेशेपि अमतानांच
स्त्रीमतानां त्रिरात्रमशौचं रोगादिना यज्ञत्यादिष्वात्मानं घातयति तेषां अग्निदाहादिकं नक राम
र्तव्यं तस्मात् मरणनिमित्तकमशौचमपि न कर्तव्यं प्रमादेनत्र्यग्न्युदकवज्रादिना मरणे सं
पूर्ति

रा
पूर्णमशौचं अग्निसंस्कारादिकाश्च क्रियाः कर्तव्याः सद्यःशौचानुवृत्तौ यमः । द्वि
वाहवहतानांच विद्युता पार्थिवेन च । गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थि
क वः । द्विवः शस्त्रविनाशलहः संमदोना आहवः संग्रामविद्युतावग्रानलेनेन्द्रं चवग्रा
नल मरणे सद्यःशौचं विधानं मरणातिके प्रायश्चित्ते पुरुषस्य मरणे ज्ञेयं पार्थिवो रा
जत्वेन प्रसिद्धो न क्षत्रिय एवेति रत्नाकरः गोब्राह्मणस्य चैवार्थे वृद्धादन्यत्रापि जलप
कोद्वारादौ मृतानां सद्यःशौचं यस्य चेच्छति पार्थिवः यस्य प्रेतस्य कायं तथा कदाचि
त्पृथिवीपतिः शद्यः शौचमिच्छति इत्याहवडातिपड्क्तौ तत्र विशेषमाह । उद्यतैराहवेश
स्त्रैः क्षात्रधर्महतस्य च सद्यः संतिष्ठते यज्ञस्तथा सौचामिति स्मृतिः सद्यःशौचाप्र
तियोजनादात्र धर्मो अप्र[illegible]कातरादि । शस्त्रैर्विषादिग्धैः पत्रैः पिण्डदानादिः
पः संतिष्ठते समाप्तिमेति । सद्य एवेत्यर्थः पराशरः ब्राह्मणार्थे विपन्नानां

Indira Gandhi National
Centre for the Arts

ह देषु

डिनां गोग्रहेष्वुच ~~प्र~~ विप न्ना नामेकरात्र मसौच कं त्र्यत्रदं डिनामि
शु॰ तित्रिष्वपिसंबध्यते तत्रष्वायमर्थः गोब्राह्मणार्थं गोग्रहे युद्धे च दंडेन मृतानामेकाहोरात्र
२१ मशौचं एवमेव हाराह्वतानां त्र्यत्रदंडिनामित्यत्र वंदिनामिति रत्नाकरे पाठः वंदिनां चौरादिग्र
हीतानां तद्दशौचमेव मरणेरेकरात्रमशौच मिति व्याख्यातं वृहस्पतिः डिंबाहवे विद्युता
च राज्ञा गोविप्रपालने सद्यःशौचं हतस्याहुर्यच्चाहेचान्ये मनुरपीयः अत्र शस्त्रैराभिमुख्येन हत
स्य सद्यःशौचं लगुडादिना पराङ्मुखहतस्य त्रिरात्रमिति व्यवस्थितविकल्पार्थः स्वकर ःच
मः डिंबाशातिहतानां च तथैव प्राकार त्रियां नदी स्वापदं दंष्ट्रिभ्यः सद्यः शौचं विधीयते प्राश
स्त्रिणामिति परार्थे प्राणत्यागानामित्यर्थः नदीति जलनाशयोपलक्षणं श्वापदानखा
युधास्ता दे च्छा चय दंष्ट्रिणो दंशनायुधाः सर्पवाराहादयः रातलघादि मरणे सद्यः
शौचं मरणांतिकप्रायश्चित्तेकामिचत्रिविणो संग्राम महो मरणे सद्यः शौचानुवृत्तौ शं खलिखितौ राम
तौ अत्र्यथ शस्त्रानाशका गिनर जुमरु जलप्रमापणैष्वेवमेव च्च्रुनाशकमभीजनेरा

वंद

तदपि सद्यः शौचं कामप्रयागादौ शस्त्रादिना मरणे प्रायश्चित्ते च मरणांति ज्ञेयं तदयं सद्यः
शौचादि बोधकसमस्तास्वंडलकार्थः संमर्द हतानां शस्त्रप्र न्यकेलरुमतानां रसा हतानां
गोब्राह्मणार्थं जलयंकादिमग्नानां संग्रामे शस्त्रैः संमुखहतानां मरणांतिके काम्यकर्मणि प्र
यागादौ प्रायश्चित्ते च शास्त्रजलाग्निश्वापदादिभिर्मृतानां च सद्यःशौचं स के ल
स्यापि राजास्थाने सद्यःशौचं ब्राह्मणार्थे च गवार्थे च दंडेन विपन्नानां संग्रामे च दंडेन विपन्न नां
ना नां वंदीकृतानां मृतानामेकाहोरात्रमशौचं॥ लगुडसंग्रामे पराङ्मुखहतस्य त्रिमशौचं प
राशरः उपसर्गमृते चैव सद्यःशौचं विधीयते तत्त्व प्रचुरोपसर्गो पिद्रवसन्निपातविषय
मिति प्रतिभाति उपसर्गमरणे संपर्काशौचस्य प्रामाणिकव्यवहारविषयत्वात् तथा
घ च प्रापद्यै विष्वकेस्याम्मित्यवसद्यः शौचेऽत्यंतदुर्भिक्षे अपि सर्गिकात्यंत मकरादि पु
प्रयांच नाशौचमिति हारलताकार आह स्मृतौ चदंद्रः स्वस्थकाले त्विदं सर्वं सूतकं
परिकीर्तितं आपद्गतस्य सर्वस्य सूतकेपि न सूतकं तु उपसृज्यते इत्युपसर्ग इत्य
य

Indira Gandhi National
Centre for the Arts

परंपरयामरणेसंस्पर्शेशौचमितिव्याख्यातंकेश्चितातन्मतेऽ[redacted]दिर्भावेउपसर्गेगस्याज्ञानात्स्वदिर्भावेचब्रणपाक

शु०
वहिर्भूतोपसर्गोमरणेसद्यःशौचंवृणपाकपूर्वंन्स्यायांमरणे ऽनध्ययनंपराव स्यादि

३०
तितद्विभावनीयं॥अथासपिंडाद्यशौचं।तत्रबृहस्पतिःदशाहेनसपिंडास्तुशुध्यंतिप्रेतसू

तके त्रिरात्रेणसकुल्यास्तुस्नात्वाशुध्यंतिगोत्रजाः सपिंडासप्तपुरुषावधयः स्ववंश्यास

कुल्यादश[redacted]पुरुषावधयः तदूर्ध्वंगोत्रजाःसूतकेप्रेतसूतकेचेत्यर्थः।मनुः गुरो

प्रेतस्यशिष्यस्तुपितृमेधंसमाचरन्।प्रेतहारैःसमंतत्रदशरात्रेणशुध्यति॥अस्यार्थः यः

शिष्योवेदाध्येतागुरुकुलेतिष्ठन्गुरोःसंस्कारंकरोतिसदशरात्रेणशुध्यतिगुरुलक्षणमा

ह।अल्पंवाबहुवायस्यश्रुतस्योपकरोतियःतमपीहगुरुंविद्यात्इतिश्रुतस्याध्ययन

स्यवेदविषयस्योपकरोतीत्यर्थः।अहइत्यनुवृत्तौगौतमः।आचार्यतत्पुत्रस्त्रीयाज्यशिष्ये

यम
षुचैवमिति।आचार्यउपनेतापूर्वकसांगवेदाध्यापकस्तस्मिन्तत्पुत्रेचमृतेतत्पत्न्यांच

मृतायांशिष्यस्यत्रिरात्रमशौचं।ज्योतिष्टोमादियागंकुर्वतोयस्यसर्वदाऽऽर्त्विज्यं

कियतेसयाज्यःतस्मिन्मृतेसतित्वृत्विजां त्रिरात्रमशौचंशिष्योत्रोपनीयसांगवेदम

राम

अश्रोत्रियेत्वसपिंडेस्ववेश्मनिमृतेएकाहोरात्रं।तथाचैकरात्रमित्यनुवृत्तौविष्णुः।असपिंडेस्ववेश्

ध्यापितस्तस्यगुरुकुलस्थितस्यैवमरणेआचार्यत्रिरात्रमशौचम।मनुः त्रिरात्रमाहुरा

शौचमाचार्येसंस्थितेसतितस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिः।दिवारात्रमहोरात्र

मित्यर्थः एतच्चाहोरात्राशौचमसिद्धस्यानिवृत्ताध्ययनस्याचार्यपत्नीपुत्रयोर्मरणेतेयअधीया

नस्यतुतयोरपिमरणेत्रिरात्रंगौतमोक्तं बृहस्पतिश्चत्रहमातामहाचार्यश्रोत्रियेष्वशुचिर्नरःमा

तुलेपक्षिणींरात्रिंशिष्यर्त्विग्बांधवेषुच।श्रोत्रियेत्वेहःकेत्स्नमनूचानेतथागुरौमृतेराज

नि सज्योतिर्यस्यस्याद्विषयेस्थिताःश्रोत्रियएकशाखाध्येताएकशाखामधीत्यश्रोत्रियसंत

वौधायनवचनात तस्मिन्स्वगृहेमृतेस्वगृहपतेःत्रिरात्रमशौचं।तथाचांगिरागृहेयस्यमृतः

च
कश्चिदसपिंडःकथंचनतस्याप्यशौचंविज्ञेयंत्रिरात्रमितितिनिश्चयः।अत्रचासपिंडःश्रोत्रियः

त्रि
अत्रत्वसपिंडःश्रोत्रियःमातुलक्षिणीमातुःसहोदरेभ्रातरिशिष्येपिगुरुकुलान्निवृत्ताध्य

यनेमृतेपक्षिणीति उपनीयवेदैकदेशाध्यापितेऽनुपनीयसंपूर्णवेदमध्यापितेचस्वगृहेम

तेशिष्येआचार्यस्यपक्षिण्याशौचं।त्विग्भिमृतेयजमानस्यपक्षिणीवान्धवोमातृबंधुर्यादिर

गेवस्पतेतन्मरणेपियाक्षिणीतु पूर्वापरदिनसहिताराज्ञिः पूर्वापरराज्ञिसहितदिनेनाश्रोत्री

न्त्र

श्रु० त्रियदाद्यादि। अत्रोत्रियेत्वस्मदेशे मृते अहः कृत्स्नमहोरात्रं व्याप्य अनूचानः साङ्गवेदाध्येता तस्मि
न्नेकग्रामे मृते गुरौ अत्यन्ताध्यायके मृते एकमहोरात्रं एवमेव द्वारं ... मृते राजनि स्वतंत्रे ते
३१ देशाधिपे सज्योतिः दिवा मरणे दिनमात्रं रात्रौ मरणे रात्रिमात्रं शौचं प्रजानामित्यर्थः गौतमः
पक्षिणी असपिंडे योनिसंबन्धे सहाध्यायिनि च असपिंडे समानोदके दशमपुरुषादूर्ध्वं
ज्ञायमानजन्मनामके मृते पक्षिणी सहाध्यायिनि च एकस्मादुरोः सहवेदमधीयानस्य विन
श्येत् पक्षिणी अन्यत्रैवाह योनिसंबंधे मृते पक्षिणी योनिसंबंधाश्च श्वश्रूश्वसुरौ च। तथा च व्य
मस्तु नु वर्त्ती मिताक्षराकारः श्वशुरयोश्च भगिन्यां च मातुलान्यां च मातुले पित्रोः स्वसरि
तद्वत् पक्षिणीं क्षपयेन्निशां मृते तथा मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च। आशौचं पक्षि
णीं रात्रिं मृता मातामहाय दि तथा संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते अत्र श्वश्रूश्व रा
शुरमरणे पक्षिणी शौचं निर्गुणजामातरि विषये मृते मित्रे च स्वगृहे मृते पक्षिणी गुरुरत्र उपनी
य किंचिद्वेदाध्यापकः अनुपनीयैकशाखाध्यापकश्च तादृशगुरोः पत्नी गुर्वंगना २१

मातृष्वसृपितृष्वसृमातुलानीमातुलपुत्रमातृष्वस्रेयपैतृष्वस्रेयदौहित्रभागिनीभागिनेयाः श्वश्रू ६

---

ज्ञा

तयोर्मृतयोः पक्षिणी जाबालः समानोदकानां त्र्यहं गोत्रजानामहः स्मृतम्। मात
बंधौ गुरौ मित्रे मंडलाधिपतौ तथा गुरुस्त्र वेदाध्यापकः मातृबांधवाः परिभाषिताः मातुःपि
तृस्वसृपुत्रा मातुः पितुः स्वसुः सुता मातुलपुत्राश्च विज्ञेया मातृबांधवाः तेषु मृ
तेष्वेकाहः मंडलाधिपतौ च जनि मृते राकारः बौधायनः त्रिरात्रमहोरात्रमेकरात्रमिति कुर्वीत
त्रेषु आचार्योपाध्यायतत्पुत्रेषु त्रिरात्रं ऋत्विजामपि शिष्यसतीर्थसब्रह्मचारिषु त्रिरात्रमहोरात्र
मेकरात्रमिति कुर्वीत। वर्णाः स्वस्य मन्वयः उपाध्यायो यत्किंचिदध्यापकः ऋत्विजो च
तिसमस्यार्थ बह्वी अ विलेषु मृतेष्वितर्थः एतच्च यजमानगृह एव मृ. तेषु त्रिरात्रं यजमान
र्थः स्य ज्ञेयं शिष्योऽपि गुरुकुले मृते त्रिरात्रं सतीर्थः समानगुरुः सब्रह्मचारी समानाचार्यः एकरात्रं प
दस्मयचादिनमात्रं रात्रमात्रं वा एतयतिशुद्ध्यादि तिरनुवृत्तैः।। विष्णुः। आचार्यमातामहे च मृते
त्रिरात्रेण। अनौरसेषु पुत्रेषु जातेषु मृतेषु च। परपूर्वासु भार्यासु प्रसूतासु मृतासु च। आ
चार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वसु... सहाध्यायिशिष्येषु चैकरात्रेण स्वदेशराज

स्य सूर्य सु

Indira Gandhi National
Centre for the Arts

निचा । अनौरसेषु औरसवर्ज्जं पित्रा स्वकाद्दशविधपुत्रेषु मृतेषु च त्रिरात्रं । परपूर्वासु पूर्वं परपरि
गृहीतासु भार्यासु त्रिरात्रं अत्रेयं पदिदं त्रिरात्राभिधानं नैवर्णिकविषयमिति रत्नाकरशुद्धिविवेको
व्याख्यानं तथापि विशेषानभिधानात् सर्ववर्णविषयत्वा सर्वप्रामाणिकानुमतत्वाच्चातुर्वर्ण्यविषया
धारणमेव विज्ञेयं हारलतादि व्यपि विशेषो नोक्तः । अत्र चार्थशब्दः पत्नीपुत्रयोः । वशीष शाठपा
ध्यायी यत किंचिदध्यापकः मातुलादयः प्रसिद्धाः सहाध्यायी वेदैकदेशसहाध्येता सपूर्ण
य वेदे सहाध्यायी निवृत्ताध्ययन श्राद्धशिष्यो अन्योपनीतो वेदसांगमध्यापितः । स्वदेशराजा स्वके
मस्थः एतेषु मृतेषु रात्रं । मातुर्गोत्रमातृ वैमात्रेयः मातुः सोदरे पार्वती मातुलादि बन्धवाः
ल ह मृतेषु त्रिरात्रं तथा च प्रचेताः मातृष्वसृमातुलयोः श्वश्रूश्वशुरयोर्गुरौ ऋत्विज्याचार्ये वि
रात्रं याज्ञवल्क्यः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च । निवासराज्ञि प्रेते तदहः शुद्धि
ए कारणं पुत्रानौसाः पुत्राः असवर्णा भार्या असवर्णाः सवर्णा षु पुत्रेषु सवर्णा भार्यासु च त्रिरा
त्रं तथा च शंखः अनौरसेषु पुत्रेषु भार्यास्वन्यगतास्वपि परपूर्वासु च स्त्रीषु त्रिरात्रा

क्ष ख

च्छुद्धिरिष्यते अत्र भार्यास्वन्यगतासु त्रिरात्रं सजातीयोत्कृष्टजातीजारस्वता । एवमेवत्वमि
त्यपुरुषांतर गासु मृतासु प्रसूतासु चाविज्ञेयं । रत्नाकरे कृष्टजातीयगमने महापातकित्वादशौ
ल चाभावादिति हारलतात्वमेवमिता शुद्धिप्रतिपत्तिस्थाच शंखलिखितौ । अन्यपूर्वासु भार्यासु सूतके
षु सुतेषु च । नात्र ध्यायो नोदकक्रिया । अत्र अन्यपूर्वा भार्या सती पुनर्भू जातीय गा ह्रेतके
:पुत्राः शास्त्रीयः कल्पित तयोः तयोनाशौचं नोदकक्रिया इति रत्नाकरः । ब्रह्मपुराणे आदावन्य
त्र दत्ता यं कुत्रचित् पुत्रयोर्द्वयोः पितुर्यत्र त्रिरात्रं स्यात् एकेनत्र सपिंडिनो । एकामातृत्वद्वयो
यंत्र पितरौ दौ च कुत्रचित् । तयोः प्रास्तूतकादैवं मृतकादापरस्परं ॥ अस्यार्थः । आदो प्रथ
ममन्येन विवाहिता तेनैव जनितपुत्रासु पुत्रयदा अन्यमाश्रिता तेनापि जनितपुत्रावतित
द्वयोरपि पुत्रयोर्मरणे प्रसवे च दिती यपितुस्त्रिरात्रं एवं विधेच विषये तत्सपिंडानामेकरात्रं
एकामाता इत्यादि एकमातृकयोर्भिन्नपितृकयोः पुत्रयोर्मध्ये एकस्य प्रसवे मरणे चेत
